UGC - CARE LISTED

ISSN-2321-7626
Vol. XXXVII, Year XI
अगस्त-अक्टूबर, 2023

# पाणिनीया
# PĀṆINĪYĀ

त्रैमासिक - सान्दर्भिक - पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

**UGC - CARE Listed**

Vol. XXXVII, Year XI
ISSN-2321-7626
अगस्त-अक्टूबर, 2023

# पाणिनीया
# PĀṆINĪYĀ

त्रैमासिक-सान्दर्भिक-पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

**महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः**
**देवासमार्गः, उज्जयिनी, मध्यप्रदेशः, भारतम्**

**अणुसङ्केतः** (E-mail) - mpsvv.paniniya@gmail.com
**अन्तर्जालपुटम्** (Website) - www.mpsvv.ac.in

**प्रधानसम्पादकः**
प्रो. विजयकुमारः सी.जी.
कुलपतिः

**प्रबन्धसम्पादकः**
डॉ. तुलसीदासपरौहा
सह आचार्यः विभागाध्यक्षश्च
संस्कृतसाहित्यविभागः

**सम्पादकः**
डॉ. पूजा उपाध्यायः
सहायकाचार्या
विशिष्टिसंस्कृतविभागः

**सह-सम्पादकाः**

**डॉ. उपेन्द्रभार्गवः**
सहायकाचार्यः
ज्योतिषज्योतिर्विज्ञानविभागः
योगविभागाध्यक्षः (प्र.) शोधसमन्वयकश्च

**डॉ. अखिलेशकुमारद्विवेदी**
सहायकाचार्यः प्र. विभागाध्यक्षश्च
वेद-एवं-व्याकरणविभागः

**डॉ. संकल्पमिश्रः**
सहायकाचार्यः
वेद-एवं-व्याकरणविभागः

**डॉ. शुभम् शर्मा**
सहायकाचार्यः प्र. विभागाध्यक्षश्च
ज्योतिष-एवं-ज्योतिर्विज्ञानविभागः

**प्रकाशकः**
कुलसचिवः
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

**सदस्यताशुल्कम्**

वार्षिकम् - 3000/-
मूल्यम् - 725/- डाकव्ययः 50/-

# शुभकामना सन्देशः

संस्कृतं नाम अपारज्ञानराशेः सागरः। यस्य यावद् मन्थनं क्रियते तावदेव नूतनानि ज्ञानमौक्तिकानि लभ्यन्ते । भारतीयज्ञानपरम्परायाः व्याख्यात्री संस्कृता वाग् सहस्त्रेभ्यः वर्षेभ्यः जगदुपकुर्वाणा महीयते । भारतीय ज्ञानपरम्पराया; संवाहकानां सुरभारती समुपासकानां विपश्चितां शोधदिशा श्रमसाधितं ज्ञानविज्ञानयोः नूतनं नूतनं लब्धं सारस्वतं प्रकाशयितुं प्रयततेतराम् अस्मदीय विश्वविद्यालयस्य सान्दर्भिकी शोधपत्रिका पाणिनीया नाम ।

अहं प्रसीदामि यत् एतस्याः सप्तत्रिंशत्तमोङ्कः प्रकाश्यमायाति । अत्र अष्टादशोधनिबन्धाः विविधानां शोधार्थिनां विदुषामाचार्याणां च प्रकाश्यमायान्ति । मन्ये एते सर्वेऽपि सुधीपाठकानां कृते लाभाय भविष्यन्तीति । अहमेतस्याङ्कस्य सम्पादनं कृतवत्यै विश्वविद्यालयस्थास्य विशिष्टसंस्कृतविभागस्य सहायकाचार्यै प्रभारिविभागाध्यक्षायै च डॉ. पूजोपाध्यायै धन्यवादं स्वस्तिकाकं च प्रच्छन् ताभभिनन्दयामि ।

**पाणिनीयं बुधैः प्रोक्तं सर्वशास्त्रोपकारकम् ।**
**पाणिनीया तथा भातु सर्वलोकोपकारिका ॥**
**ऋषीणां ज्ञानविज्ञाने संस्कृतिश्च परम्परा ।**
**तत्सर्वं पाणिनीयायां शक्यते पठितुं बुधैः॥**

**विदुषां वशंवदः**

**( आचार्यविजयकुमारः सी.जी. )**
कुलपतिः
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः
उज्जयिनी (म.प्र.)

# सम्पादकीयम्

**वेदान्तविज्ञानसुनिश्चितार्थाः, संन्यासयोगाद् यतयः शुद्धसत्वाः ।**
**ते ब्रह्मलोकेषु परान्तकाले, परामृताः परिमुच्यन्ति सर्वे ॥**

विदुषां हृत्सु विराराज्यमानाय शब्दब्रह्मणे नमः। अवन्तिकातीर्थक्षेत्रे संस्कृतमातुः सपर्यां कुर्वन् देदीप्यते महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः । विश्वविद्यालयेन शास्त्रसंरक्षणाय पाणिनीयेत्यभिधायिनी पत्रिका प्रकाश्यते । विश्वसाहित्यमूर्धन्ये भारतीयसाहित्ये अनुसन्धानाय अवसराणां नास्ति मर्यादा काचित् । नित्यः कालापरिच्छिन्नः वेदः अखिलेपि क्षितिमण्डले ज्ञानस्य विशालो निधिरिति मन्यते । विविधशास्त्राणां मूलस्रोतो वेदेभ्य एव निर्गतम् । मेधाविनः अनुसन्धातारः एतस्मात् ज्ञानावर्णवात् महता श्रमेण मौक्तिकानि चययन्ति । तान्येव मौक्तिकानि मालिकायां ग्रथित्वा अध्ययनशीलानां पाठकानां करकिसलये समुपस्थापयन् हर्षमनुभवति विश्वविद्यालयः । पत्रिकेयमनुसन्धित्सूनां कृते उपकाराय सम्पत्स्यत, इति मे दृढीयान् विश्वासः । भगवत्याः सुरभारत्याः अनुग्रहेण प्रतिभावतां प्रतिभा इतोऽपि भायादिति सम्प्रार्थ्य सम्पादकीयवचनादुपसंहरामि ।


सम्पादिका

**डॉ. पूजा उपाध्यायः**

सहायिकाऽऽचार्या

विशिष्टसंस्कृतयोगशिक्षाशास्त्रविभागाध्यक्षा (प्र.) शोधसमन्वयिका च

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी

# अनुक्रमणिका


कुलपतिसन्देशः iii

सम्पादकीयम् iv

**संस्कृत-प्रभागः**

1. सन्नन्तधातुयोगेऽन्वयबोधविचारः 1

**- डॉ. कुञ्जबिहारी द्विवेदी**

2. लक्ष्मीतत्त्वानुशीलने मेघकाव्यं महौषधम् 7

**- डॉ. लक्ष्मीकान्तषडङ्गी**

3. नाट्यशास्त्रीयदृष्ट्या मृच्छकटिकम् 12

- **शशिशेखर पाण्डेय**

4. शतपथब्राह्मणे उपाख्यानस्वरूपम् 19

**- सर्वेश ओझा**

5. याज्ञवल्यसंहितासन्दर्भे आधुनिकविचारव्यवस्थायां चतुष्पाद्व्यवहारः 27

**- रिया दत्तः**

**- डॉ. राज किशोर आर्यः**

6. पञ्चाननतर्करत्नविरचिते अमरमङ्गले शान्तरसस्य प्रयोगवैचित्र्यम् 33

**- श्यामसुन्दर सरदारः**

7. वाल्मीकीयरामायणे वैदिकयागस्य प्रासङ्गिकता 40

**- पापिया बेरा**

**हिन्दी-प्रभागः**

8. प्रो. रेवाप्रसाद द्विवेदी प्रणीत सीताचरितम् महाकाव्य में राष्ट्रीय भावना 47

**- डॉ. सूर्यकान्त त्रिपाठी**

9. हठयौगिकपरिप्रेक्ष्य में बंधों का समीक्षात्मक अध्ययन 53

**- डॉ. प्रिया पैजवार**

**- प्रो. एच.एच. अवस्थी**

**- प्रो. दीपा मिश्रा**

10. गृह निर्माण में गर्भन्यास का महत्त्व 58
**- रञ्जन प्रसाद कुर्मी**
11. भारतीय संस्कृति में वृक्षों का वैज्ञानिक महत्त्व एवं संरक्षण 63
**- हेमराज पलसानिया**
12. संस्कृत नीति ग्रन्थों में निर्दिष्ट जीवनचर्या : एक विवेचन 71
**- साहिल महाजन**
13. स्नेहसौवीरम् में रस विमर्श 77
**- शैलेष कुमार कुशवाहा**
14. अवन्तिका तीर्थक्षेत्र में स्थित चौरासी (84) महादेव मंदिर : एक अध्ययन 85
**- कंचन तिलवानी**
**- डॉ. उपेन्द्र भार्गव**

**आंग्ल-प्रभागः**

15. Semiotic contributions made by Sanskrit, particularly in 'Sabdaarthasambandha'. 91
**- Dr. Pradeep Varma.P.K**
16. Mudrārākṣasa of Viśākhadatta Undercurrents of Science of Polity in consonance with Dramatic Devices 97
**- Sreevidya G**
17. Various Dimensions of Town Planning in Indian Architecture: From Ancient to Modern Civilization 104
**- Rashmi Tiwari**
**- Dr. Upendra Bhargava**
18. Science of Sound - The Language of Knowledge 113
**- Ms. Menka Kuril**

**UGC - CARE Listed** Vol. XXXVII, Year XI
ISSN- 2321-7626
अगस्त-अक्टूबर, 2023

# सन्नन्तधातुयोगेऽन्वयबोधविचारः

**डॉ. कुञ्जबिहारी द्विवेदी***

**शोधसारः -** सन्नन्तधातुयोगे यदि द्वितीयायाः विशेष्यत्वमर्थः तदा 'पाकं चिकीर्षति' इत्यत्र 'पाकः मत्कृतिसाध्यः' इतीच्छा स्वीकरणीया। परन्तु सनः धात्वर्थाविशेष्यकेच्छावाचित्वं स्वीक्रियन्ते तेन धात्वर्थः एव विशेष्यतया भासेत तादृशी इच्छा ''पाककृतिर्भवतु'' इत्येवंरूपा स्वीकरणीया। कर्तृवाच्ये चिकीर्षापदेन 'कृतिविशेषितेच्छा' प्रतीयते। 'पाकश्चिकीर्ष्यते' इति कर्मवाच्चे तु चिकीर्षापदेन 'इच्छाविशेषितकृतिः' प्रतीयते अत्र तु आख्यातस्य कर्मत्वमर्थं न तु द्वितीयायाः। अत्रापि कर्मवाच्येऽपि कृतिविशेषितेच्छा सन्नर्थस्वीकारे बहवः दोषाः प्रदर्शिताः। परन्तु सिद्धान्ततः कर्मवायेऽपि कृतिविशेषितेच्छा' एव सन्नर्थतया प्रतीयते इति उक्तम्। धात्वर्थविशेष्यकशाब्दबोधश्च भवत्येव।

**कूटशब्दाः -** सन्नन्तधातुः, अन्वयबोधः, धात्वर्थः।

पाकः मत्कृतिसाध्यः भवतु पाकं कृत्वा साध्यामि[1] इतीच्छासत्वे पाकं चिकीर्षति इति प्रयोगः भवति अत्र कर्तुमिच्छा चिकीर्षा कृ धातोः कृतिरर्थः, सन्प्रत्ययस्य इच्छा अर्थः कृतीच्छयोः कर्म पाकः तदुत्तरद्वितीयाया विशेष्यत्वमर्थः। एवञ्च सन्नर्थेच्छानिरूपितविशेष्यता पाकेऽस्ति सन् प्रकृतिभूतकरोत्यर्थकृतौ प्रकारता प्राप्ता तेन कृतिप्रकारकपाकविशेष्यकेच्छा इति बोधः भवति।

अथवा सनः धात्वर्थविशेष्यकेच्छावाचित्वं स्वीकार्यम् , एवञ्च धात्वर्थः कृतिः अत्र विशेष्यः पाकपदोत्तरद्वितीयायाः साध्यत्वमर्थः तस्य कृतौ अन्वयः तेन

*सहायकाचार्यः, न्यायवैशेषिकविभागः सं.सं.वि., वाराणसी

पाकनिष्ठसाध्यतानिरूपकः कृतिविशेष्यकेच्छाश्रयः इति बोधोऽत्र जायते। अस्मिन्मते कृतिविशेष्यकेच्छाया आकारः 'पाककृतिर्भवतु' इति स्वीकरणीयः। पूर्वस्मिन्मते इच्छाकर्मत्वं विशेष्यत्वरूपमासीत् अस्मिन्मते कृतिकर्मत्वं साध्यत्वरूपमिति भेदः। धात्वर्थप्रकारक-इच्छाविशेष्यत्वरूपकर्मत्वस्वीकारे 'गृहं स्थित्याश्रयो भवतु' इत्याकारकगृहविशेष्यकस्थितिप्रकारेकेच्छातत्वे 'गृहं तिष्ठासति' इति प्रयोगापत्तेः एवं सनः धात्वर्थप्रकारकेच्छावाचितवे 'ओदनभोजनं भवतु' इतीच्छासत्त्वे 'ओदनं बुभुक्षते' इति प्रयोगः न स्यात् इच्छायां भोजनस्याप्रकारत्वात् ।[2]

अत्र सनः धात्वर्थपकारकेच्छावादिमते कर्मतासम्बन्धेन भोजनप्रकारिका ओदनविशेष्यका इच्छासत्वे तस्याः अयमाकारः - 'कर्मतासम्बन्धेन भोजनविशिष्टः ओदनः भवतु'[3] भोजनकर्म ओदनं भवतु[4] भोजने ओदनः भवतु वा तदा एव 'ओदनं बुभुक्षते' इति प्रयोगः । इच्छा च इष्टसाधनताज्ञानेन भवति अतोऽत्र 'भोजनं मदिष्टसाधनम्' भोजनविशिष्टौदनं मदिष्टसाधनम् इति वा इष्टसाधनताज्ञानं ग्रहीतव्यम् । असिद्धस्यैव इच्छाविषयत्वात् सिद्धमौदनं कथं इच्छाविषयः इति शङ्कनीयम् ओदनस्य सिद्धत्वेऽपि भोजनविशिष्टस्य ओदनस्यादि्धतया तदिष्टसाधनताज्ञानात् इच्छा संभवति। यत्र 'भोजनोत्तरकालिकं गमनं भवतु' 'भुक्तौदनजन्या पुष्टिर्भवतु' इति वा इच्छा अस्ति न तदा 'ओदनं बुभुक्षते' इति प्रयोगः, मुख्यविशेष्यताधात्वर्थे एव इच्छाप्रकारतासत्वे तादृशप्रयोगः। 'भोजनोत्तरकालिकं गमनं भवतु' इतीच्छायां गमनं विशेष्यः तत्र विशेषणं उत्तरकालिकत्वं न तु धात्वर्थः भोजनं विशेषणमस्ति। 'भुक्तौदनजन्या पुष्टिर्भवतु' इत्यत्रेच्दायां विशेष्यः पुष्टिः तत्र ओदनजन्यत्वं विशेषणं नतु धात्वर्थः भोजनम् । 'कर्मतासम्बन्धेन भोजनविशिष्टः ओदनः भवतु' इतीच्छायां विशेष्यः ओदनः तत्र विशेषणं भोजनम् । 'कर्मतासम्बन्धेन भोजनविशिष्टः ओदनः भवतु' इतीच्छायां विशेष्यः ओदन तत्र विशेषणं धात्वर्थः भोजनं तत्र इच्छाप्रकारतायाः सत्त्वात्' ओदनं बुभुक्षते' इति प्रयोगः सम्भवति। अथवा 'भोजनकर्म ओदनः भवतु' इतीच्छायां ओदनः विशेष्यः तत्र भोजनकर्मत्वं विशेषणं तादृशकर्मत्वे इच्छाप्रकारतायाः सत्त्वेन सः प्रयोगः संगच्छते। इच्छायां भोजनस्य विशेषणतया भासमाने तादृशप्रयोगः जायते इति मतं न सम्यग् 'भोजनं भवतु' इत्यादि भोजनविशेष्यकेच्छासत्त्वे एव 'ओदनं बुभुक्षते' इति प्रयोगः प्रामाणिक अतः धात्वर्थविशेष्यकेच्छा एव सन् प्रत्ययार्थः।

धात्वर्थविशेष्यकेच्छा धात्वर्थप्रकारकेच्छा वान्यतरः सन्प्रत्ययार्थः न स्वीकर्तुं शक्यते, एवं स्वीकारे 'स्थितिमद् गृहं भवतु' इतीच्छायां गृहस्य विशेष्यत्वात् 'गृहं

तिष्ठासति' इति प्रयोगापत्तेः[5] इति च 'भोजनकर्म ओदनो भवतु' इतीच्छासत्त्वे 'ओदनं बुभुक्षते' इति प्रयोगः तदा भोजनस्य इच्छायां न विशेष्यत्वसम्बन्धेनान्वयः अपितु उद्देश्यत्वसम्बन्धेनान्वयः । इच्छाया उद्देश्यं भोजनं भवति अतः इच्छायां भोजनं प्रकारः विशेष्यो वा भवतु उद्देश्यत्वमस्त्येव तेन 'ओदनकर्मकभोजनोद्देश्यकेच्छाश्रयः' इति बोधः।

अत्र अपरा शङ्कोदेति - 'पाकं चिकीर्षति ओदनं बुभुक्षते' इत्यादौ द्वितीयायाः कर्मत्ववाचकत्वेन कारकतया पाकौदनादेः कर्मत्वेन धात्वर्थे कृतिभोजनादौ अन्वयः क्रियते। परन्तु कर्माख्यातस्थले 'पाकश्चिकीर्ष्यते' 'ओदनो बुभुक्ष्यते' इत्यत्र आयातस्यैव कर्मत्वमर्थः, प्रत्ययास्तु प्रकृत्यन्वितः एव स्वार्थं बोधयति। अत्र सन्नन्तधातूत्तरम् आख्याततयादिप्रत्ययः जातः न तु कृञ्भुजादिधातूत्तरं तथा च आख्यातप्रकृतिः सन्नन्तधातुः, न तु कृञ्भुजादिधातुः आख्यातार्थः कर्मत्वं सन्नर्थेच्छया अन्वितं सत् कर्मत्वमर्थं बोधयितुं समर्थः तेन इच्छाकर्मत्वं - पाकौदनादौ प्राप्तः न तु कृतिकर्मत्वं भोजनकर्मत्वं वा। तत्र समाधानमिदं - 'कर्त्राख्यातस्थले चिकीर्षति' इत्यादौ कर्तुमिच्छा चिकीर्षा इति कथनात् इच्छा विशेषतया भासते। कर्माख्यातस्थले च कृतिभोजनादौ धात्वर्थे इच्छा विशेषणं भवीति मन्तव्यम् । तेन सन्नर्थः इच्छाविशिष्टकृतिरेव तेन सह आख्यातार्थः कर्मत्वं अन्वेति इति रीत्या कृतिभोजनादिकर्मत्वं कर्माख्यातस्थलेऽपि प्रतीयते, न तु कृतिभोजनादीच्छकार्मत्वं इति पाकौदनादेः कर्मत्वं संगच्छते। तथा च पाकश्चिकीर्ष्यते इति वाक्येन 'इछाविषयीभूत-कृतिनिरूपितकर्मतावान् पाकः' इति बोधः एवं 'ओदनो बुभुक्ष्यते' इति वाक्येन इच्छाविषीयभूतभोजननिरूपितकर्मतावान् ओदनः इति बोधः भवति। आख्यातार्थ वर्तमानत्वाद्यर्थस्य च कर्त्राख्यातस्थले कर्माख्यातस्थले चोभयत्रैव इच्छायामन्वयः। कर्तृवाच्ये तु कृतिविषयकेच्छा चिकीर्षा तत्र इच्छापदार्थे एव आख्यातार्थवर्तमानत्वरूप-पदार्थस्यान्वयः ।

कर्मवाच्ये तु सन्नर्थः इच्छाविशेषितकृतिरेव तत्र पदार्थैकदेशे इच्छायां आख्यातार्थपदार्थस्यान्वयः यथा 'नीलतरो घटः' इति वाक्ये नीलपदार्थः नीलरूपविशिष्टः घट एव तस्यैकदेशे नीले तरबर्थातिशयस्यान्वयः। इच्छाविषयकृतेः सन्नन्तधात्वर्थत्वे कृतावेव वर्तमानान्वय स्वीकारे अतीतेच्छाधीनपाककृतिकाले पाकं चिकीर्षतीति प्रयोगापत्तिः न चेष्टापत्तिः इदानीं पाको न चिकीर्ष्यते किन्तु पूर्वं चिकीर्षितः इति प्रयोगात् ।

अत्र शङ्क्यते - कर्मवाच्यस्थलेऽपि पाकश्चिकीर्ष्यते' इत्यादौ 'कृतिविशेषितेच्छा' एव प्रतीयमाना भवतु यथा च कर्तृवाच्ये भवति इच्छायां विशेषणीभूतकृतेः कर्मत्वेऽन्वयोऽस्तु अर्थात् कृतिविषयकेच्छानिरूपितकर्मत्वाश्रयः पाकः

इति बोधः तत्र स्वीक्रियताम् यथा इच्छाविशेषितकृतेः सन्नर्थस्वीकर्तुमते तदेकदेशे इच्छायां आख्यातार्थवर्तमानत्वस्यान्वयः तद्वत् कृतिविशेषितेच्छा सन्नर्थस्वीकर्तृमते तदेकदेशकृतेः कर्मत्वेन सहान्वयोऽस्तु। परन्तु एतन्न सम्भवति ''एकत्र विशेषणतयोपस्थितस्य अन्यत्र विशेषणतयाऽन्वयो न भवति'' कर्मवाच्ये कृतिविशेषितेच्छास्वीकर्तृमतेऽयं दोषः आपतति। कृतेः विशेषतया इच्छायां अन्वयः कृतः पुनः कृतेः विशेषणतया कृतौ भासते कृतेश्च विशेषणतया आख्यातार्थकर्मत्वेऽन्वयः। एवमिच्छायां आख्यातापरार्थस्य वर्तमानत्वस्य विशेष्यतयाऽन्वय ''वर्तमानकालिकेच्छाविशेषितकृतिनिरूपितकर्मत्वाश्रयः पाकः'' इति बोधः। अत्र प्रश्नः कथमेकस्य वस्तुनः एकत्र विशेषणे जाते नान्यत्र विशेषणम् ? इति चेच्छृणु - 'पचमानं पश्य' इत्यन्त्र पचमानपदस्य 'पाककर्ता' अर्थः तदुत्तरद्वितीयार्थः कर्मत्वं, पाकस्य कर्तरि विशेषणतयाऽन्वयः पाककर्तुः कर्मत्वेऽन्वयः, कर्तरि विशेषणीभूतपाकस्यापि कर्मत्वे विशेषणतयान्वयात् पाककर्मकदर्शनतात्पर्येण 'पचमानं पश्य' इति प्रयोगापत्तिः तद्वारणायायं नियमः स्वीकर्तव्यः। किञ्च प्रकृत्यर्थैकदेशेऽपि प्रत्ययार्थस्यान्वयः ''इत्यपि नियमः यथा 'सम्पन्नो व्रीहिः'' इत्यत्र व्रीहित्वे एकत्वान्वयः। सोऽपि मार्ग अत्र अनुसर्तुं न शक्यते कृतिविशेषितेच्छायाः एकदेशे कृतौ आख्यातार्थकर्मत्वस्य नान्वयः यतोहि आख्यातस्य प्रकृति सन्नन्तः सन्नर्थस्तु इच्छामात्रं तस्यैकदेशः कृतिः नास्ति कथं तत्र आख्यातार्थकर्मत्वान्वयः सम्भवति। यतो हि कृतिकर्मपाकः इत्यन्वयबोधोपगमे कृतिनिष्ठप्रकारता न इच्छानिष्ठविशेष्यतानिरूपिता यद्यपि इच्छायां कृतिः विशेषणमस्ति अतः कर्मत्वे इच्छान्वयात् कृतेरप्यन्वयः इत्यपि न स्वीकर्तुं शक्यते इच्छायाः कर्मत्वे अन्वयः एव न भवति। विशेष्यस्य (धर्मिणः) अन्वये एव धर्मिपारतन्त्र्येण विशेषणान्वयः भवति अत्र तु विशेष्यान्वयः एव न भवति। पाकादिनिष्ठं कर्मत्वं कृत्यादिमात्रनिरूपितमस्ति न तु समर्थेच्छानिरूपितं तस्मादिच्छायाः कर्मत्वेनान्वयः।

अथवा इच्छाकृत्योरुभयोरपि कर्मत्वेऽन्वयः स्वीकार्यः एवञ्च कर्माख्यातस्थले कृतिविशेषितेच्छायाः सन्नर्थत्वे इच्छाकृत्योरुभयोरपि सविषयत्वात् निरुपितत्वसम्बन्धेन विषयता कर्मत्वेऽन्वयः अतः धर्मिपारतन्त्र्येण धर्मिणः इच्छायाः कर्मत्वेऽन्वयात् इच्छाविशेषणस्य कृतेरपि अन्वयः सिद्धः। परन्तु एवं स्वीकारे 'ओदनो बुभुक्ष्यते' इत्यत्र धात्वर्थसन्नर्थोभयोरपि अन्वयः न सङ्गते यतोहि इच्छायाः विषयतारूपकर्मत्वेऽन्वयेऽपि भोजनस्य सविषयकत्वाभावात् न विषयतारूपकर्मत्वेऽन्वयः। अत्र इच्छाकर्मत्वं विषयारूपम् भोजनकर्मत्वञ्च गलाधस्योगरूपम् । पाकश्चिकीर्ष्यते इत्यन्त्र

कृतिकर्मत्वमिच्छाकर्मत्वञ्च विषयतारूपमेकमेव अतस्तत्रान्वयः सम्भवति। वस्तुतः 'पाकश्चिकीर्ष्यते' इत्यत्रापि कृतिकर्मत्वं इच्छाकर्मत्वञ्च भिन्नमेव इच्छाकर्मता प्रकारतारूपा कर्मत्वे इच्छायाः विशेषणत्वात् , कृतिकर्मता तु न प्रकारतारूपा कृतेः कर्मत्वेऽविशेषणात् अतः कृतिकर्मता उद्देश्यतारूपा पाकस्योद्देश्यत्वात् अतः धर्मिपारतन्त्र्येणापि न कृतेः कर्मत्वेऽन्वयः अस्मिन्पक्षे।

यद्यपि इच्छायाः विषयत्वरूपकर्मत्वव्यक्तावन्वयः सा व्यक्तिः भिन्नाः एवं कृतिनिरूपितविषयत्वरूपकर्मत्वव्यक्तिरन्या भवतु नाम तथापि अन्वयी विषयत्वरूपकर्मत्वं अन्वयितावच्छेकदकं विषयतात्वं तदवच्छिन्ने एव इच्छाकृत्योरन्वय प्रतीतिसिद्धः । तथा च विशेष्यान्वयितावच्छेदकावच्छिन्ने एव विशेषणस्य विशेष्यपारतन्त्र्येणान्वयः इति नियमः यथा - ''अरुणया पिङ्गाक्ष्यैकहायन्या गवा सोमं क्रीणाति'' अत्र गोपदोत्तरतृतीयायाः साध्यत्वकर्थः, साध्यत्वस्य सोमक्रयेऽन्वयः[6] साध्यत्वे च गोः आरुण्यस्य चान्वयः गोस्तु साक्षात् साध्यत्वेऽन्वयः आरुण्यस्य गरुपधर्मिपारतन्त्र्येण आरुण्यस्य च साक्षात् क्रयणसाधनत्वं नास्ति। अतः द्वयोः साध्यत्वं भिन्नं तथापि साध्यतात्वावच्छिन्ने एव उभयोरन्वयः भवत्येव अन्वयिताच्छेदकविषयतात्वेन विषयतायां कृतीच्छयोरन्वयस्वीकृते ''भोजनकृतिर्भवतु पाकश्च भवतु'' इति समूहालम्बनेच्छादशायां इच्छाविषयतायाः कृतिविषयतायाश्च सत्त्वात् ''पाकश्चिकीर्ष्यते'' इति प्रयोगापत्तिः अस्मिन् समूहालम्बनज्ञाने यद्यपि इच्छाविषयता पाकेऽस्ति तथापि कृतिविषयता भोजनेऽस्ति इच्छाकृत्युभविषयतायाः पाके वर्तमाने एव पाकिश्चकीर्ष्यते इति प्रयोगः भवति। तथापि कालान्तरीयकृतिविषयतायाः पाके सत्त्वात् विषयतात्वेनोभयविषयतयोरनुगमात् उभयविषयतायाः सत्त्वात् 'पाकाश्चिकीर्ष्यते' इति प्रयोगापत्तिः।

तद्दोषवारणायेदं वक्तव्यम्, इच्छा यत्र कर्मणि अन्वेति तादृशेच्छायां विषयितासम्बन्धेन विशेषणीभूता या कृतिः तत्कृतिकर्मत्वस्यापि अन्वये 'पाकश्चिकीर्ष्यते' प्रयोगः भवति ''भोजनकृतिर्भवतु पाकश्च भवतु'' इतिसमूहालम्बनेच्छायां पाककर्मणि येच्छाऽन्वेति तत्र विशेषणीभूता कृतिरेव नास्ति, न तादृशप्रयोगापतिः। तथापि तादृशसमूहालम्बेनच्छासत्वे ''पाकः इदानीं न चिकीर्ष्यत'' इति प्रयोगानुपपत्तिः (पाकः इदानीं न चिकीर्ष्यते इति प्रयोगः तदा भवति यदा पाके इच्छाकर्मतवकृतिकर्मत्वद्वयोरन्यतराभावो वा वर्तते) कर्माख्यातस्थले कृतिविशेषितेच्छा इति पक्षे इच्छाकर्मत्वमेव (विषयत्व) पाके वर्तते, अतः तादृशप्रयोगापत्तिः। तत्र इच्छाविशेषितकृतिः सन्नर्थः इति पो तु कृतिकर्मत्वं (विषयत्वं) पाके नास्ति इति अतः तत्पक्षे प्रयोगः संगच्छते।

परन्तु प्रथमपक्षे इच्छासत्वेऽपि वर्तमानकालावच्छिन्नकृतिविषयत्वाभावो वर्तते एव अतः विशेष्यस्य सत्त्वेऽपि विशेषणाााावाद्विशिष्टाभावो वर्तते तस्मात्तत्प्रयोगः संगच्छते इत्यनया रीत्या दोषपरिहारे यत्र तादृशसमूहालम्बेनच्छातः किञ्चित् पूर्व 'पाककृतिर्भवतु' इतीच्छा आसीत् तत्र पूर्वोक्तसमूहालम्बनस्थितौ तादृश प्रयोगापत्तिरस्त्येव कृतिविषयत्वस्यापि पाके सत्वात् इच्छाकृत्योः विषयत्वाभावस्यासत्त्वात् पाककृतिर्भवतु इतीच्छायाः असत्वे उक्तसमूहालम्बेनच्छासत्वे 'इदानीं पाकः न चिकीर्ष्यते' इति प्रयोगः प्रामाणिकः। यस्य पाककृतिर्न जायते, 'पाककृतिर्भवतु' इतीच्छा वर्तते तत्र 'पाकः इदानीं न चिकीर्ष्यते' इति प्रयोगः न भवति।

**सन्दर्भाः**

1. व्युत्पत्तिवादः सादर्शः, पृ. 424
2. व्युत्पत्तिवादे मूले, पृ. 427
3. व्युत्पत्तिवादः जयाटीकासहितः, पृ. 227
4. व्युत्पत्तिवादस्य गूढार्थततत्त्वालके, पृ. 137
5. व्युत्पत्तिवादः रामरुद्रीसहितः, पृ. 126
6. व्युत्पत्तिवादः शास्त्रार्थकलायुतः, पृ. 243

**UGC - CARE Listed** Vol. XXXVII, Year XI
ISSN- 2321-7626
अगस्त-अक्टूबर, 2023

# Science of Sound - The Language of Knowledge

**Ms. Menka Kuril,** *

**Abstract :** When we think of sound as a science, the first thing to get connected is the sound of Mother Nature.The beneficial effects of nature's sounds on human health have been known since ancient times.Therefore nature is a source of life and this source has its own unique sound. The Vedic conception of sound is that it is a fundamental aspect of the universe and is considered to be the first manifestation of creation. Knowing a language includes knowing the sounds of that language. The knowledge is a sound vibration, energy but it has no language. The aim of language of knowledge is holistic health and well-being.
**Keywords :** Sound, Knowledge, Energy, Healing, Holistic, Sanskrit, Akshara, Supreme, Vibrations, Prama, Pramana.

## Introduction

When we think of sound as a science, the first thing to get connected is the sound of Mother Nature. We, as human beings are the combination of both Purush and Prakriti and are so much unconsciously connected with Mother Nature and the medium is the various sounds to experience. The basic elements of sound are also found in nature. On the other hand, everything in nature is a rhythm. The rain, for example, has its own rhythm. Rhythm is also hidden in the ocean waves or even in the sunrise and the sunset. Moreover, the rhythm of music is also reflected in the planet's movement and the cycle of the seasons. As a conclusion, it's

* Research Scholar, Department of Yoga,
Maharshi Panini Sanskrit Evam Vaidik University, Ujjain.

understood that nature and music are one and nature influences music. If you are wondering how this happens, it's simple. In nature the sounds are the animal's voice, such as the bird's song or the peaceful sound of raindrops, lake water, rivers and ocean waves. On the other hand, everything in nature is in a form of sound. The rain, for example, has its own unique sound. The sound in nature shares so much knowledge with us. There have been continuously so much research work done on the sensitivity and energy field of the plants, animals on the level of sensitivity they have for various sounds, how they interact and how they response to external influences.

The beneficial effects of nature's sounds on human health have been known since ancient times. We can find the beauty of nature so beautifully expressed in many Mahakavya of kalidas. Ancient Scripture are inherently connected with nature, hence proving that God, human beings and Mother Nature form an inseparable unity. Therefore nature is a source of life and this source has its own unique sound. The language of ancient Indian scriptures is mainly Sanskrit. And it is said that the perfect form of the Sanskrit language had existed thousands of years before the infancy of the earliest prime languages of the world. Sanskrit is the first script and mother of all languages in the world. We can find the roots of Sanskrit in all the languages of the world.

**Science of Sound - Sound is all about vibrations.**

Sound is a type of energy made by vibrations. When an object vibrates, it causes movement in surrounding air molecules. These molecules bump into the molecules close to them, causing them to vibrate as well. This vibration is sound. The Vedic conception of sound is that it is a fundamental aspect of the universe and is considered to be the first manifestation of creation. In the Vedas, sound is known as "Nada" or "Shabda," and is believed to possess the power to create and sustain the universe. The sacred syllable "Om" is considered to be the primordial sound or the sound of the universe, and is often used in meditation and ritual practices to connect with the divine. Additionally, the Vedas also recognize the therapeutic benefits of sound and various forms of chanting, such as the use of mantras, are used in Ayurvedic medicine to balance the body and mind. In the Vedas, sound is given great importance, being understood to be the origin of the material universe and the means of escaping (moksha) from it.

In the Srimad Bhagavatam we find a definition for sound (shabda) as follows:

**अर्थाश्रयत्वं शब्दस्य द्रष्टुलिङ्गत्वमेव च ।**

**तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः।।३३।।**

"Persons who are learned and who have true knowledge define sound as that which conveys the idea of something indicates the presence of a speaker and constitutes the subtle form of ether."

Sound is not just the vibration created by the meeting of two objects. Sound is that which conveys the idea of something. The audible sound is categorized into 50 alphabets of Sanskrit called "akshara", which literally means "infallible" or "supreme".

In the Tantras the akshara are traced back to their material source level which is a particular manifestation of energy. Each of the stages of manifestation are phases in the evolution of the universe, evolving from the most subtle (sound) down to the most gross (earth).Thus the akshara are potent sound, constitutionally connected to objects as sound (shabda) and its meaning (artha).

According to Shrimad Bhagwadgeeta, the syllable Aum contains all elements of existence. It is the reservoir of all energies of the Supreme Lord, and for this reason Lord Krishna states (8.12):

"ओम् इत्य् एकाक्षरं ब्रह्म" means "The single syllable aum is the supreme combination of letters."

Similarly Bhagwad Geeta, chapter 8, shlok 11, mentions that "यदक्षरं वेदविदो वदन्ति" means "The knowers of the Vedas recite Aum (akshara)."

And "प्रणवः सर्ववेदेषु शब्दः" means"Within all the Vedas, I am the symbol Aum."Shrimad Bhagwadgeeta (7.8):

Because the syllable Aum is the Supreme Lord and the potency of all Vedic mantras Sri Caitanya Mahaprabhu established the pranava as the maha-vakya of the Vedas, for within it exist all Vedic hymns (and shabda).

The world itself is a manifestation of this syllable. It is the sound representation of the Absolute Truth. The Vedas are all about the effect of sounds on the human system.

Since sound is the non-material source of the material manifestation, it is the key by which we can become free from the influence of matter. It is the thread-like link between the material and spiritual realms.

Until the end of the period when the books of the *Brāhmanams* were being completed, the Vedas were an oral tradition. Thus, these were referred to as the *Shrutis*. The *Manusmriti* states that *Śrutistu vedo vigneyah* "(श्रुतिस्तु वेदो विज्ञेय)"that means- know that Vedas are *Shruti*.

The *Shrutis* consisted of the collection of all the *Samhitas, Brāhmanas, Aranyakas* and *Upanishads*. Since the very beginning of the chanting of the Vedic mantras, the Rishis have laid much emphasis on the science of sound and its effect on human consciousness.

Until the end of the *Brāhmanam* period (when the books of the *Brāhmanam* were completed), there arose a need in the minds of the Vedic pundits to preserve this valuable treasure of knowledge from going extinct. Thus, the idea of a script to write down Sanskrit materialized. The sound system had to be organized to make it easily accessible and understandable to the students of the Vedas.

**The Sound of Language and concept of Knowledge**

Knowing a language includes knowing the sounds of that language. Everyone who knows a language knows how to segment sentences into words and words into sound. Now here a question arises, the language has som sound but what is the language of knowledge. So firstly, we need to understand the meaning and definition of Knowledge.

In the history of Bhartiya Darshan, there is a lot of discussion on the nature and meaning of Knowledge. The reason for this can be found in the fact that all schools of Indian Philosophy, except the cârvâkes, have recognised ignorance (avidyâ) or false knowledge (mithyâjñâna) as the root cause of human sufferings. So all of them have tried at their best to discover the meaning and proper understanding processes of true knowledge (pramâ) by which reality (tattva) can be known and the human misery can be overcome. This feeling of all Indian philosophers has been echoed by the voice of Vâcaspati in commentary to first sûtra of Gautama's Nyâya Sûtra. He comments that the study of pramâna (the sources of knowledge) is necessary. Only through it we can properly know reality (tattva) and truly guide our actions so as to be able to attain desirable end and avoid sufferings. Therefore, Indian philosophers gave high importance on the discussion of true knowledge (pramâ) in their philosophical investigation.

In Indian Philosophy the word Jñâna denotes for both true cognition or knowledge and false cognition or apramâ (false knowledge). For this reason in Indian philosophy the word 'pramâ'stands for true cognition (Yathârthâjñâna). But the division of knowledge into true knowledge and false knowledge is meaningless and false knowledge is only a name for no knowledge. Knowledge illuminates things other than itself.

Nyâya believes "knowledge reveals both the subject and the object which are quite distinct from it. All knowledge is a revelation or manifestation of objects. Just as a lamp manifests physical things placed before it, so knowledge reveals all objects which come before it." According to the Nyâya-Vaiseshika philosophy, knowledge means awareness or apprehension of objects. Aadi Guru Shankaracharya, the chief exponent of Advaitavedânta philosophy, distinguishes between higher knowledge and lower knowledge. Higher knowledge is true knowledge (Vidyâ) and lower knowledge is false knowledge (Avidyâ).

**Discussion - Language of Knowledge**

Hereby a question comes in mind, what is the language of Knowledge?

Does Knowledge have any language? From the above discussion, it can be concluded that the knowledge can't be expressed in any specific language. The knowledge is a sound vibration, energy but it has no language and in Bharat it is said that the Vedas are the books of knowledge and they are return in Sanskrit text in that's specific period. Vedic people were convinced that the Rishi did not craft these sounds as Veda mantras; they 'saw' them in the universe and simply transmitted them in Sanskrit language. The knowledge came on earth in the form of Vedas which is just the sound vibration with specific energy pattern. For them, the most prevailing language of understanding and expression was Sanskrit. So the perceived the knowledge and transcript the same. Whosoever is open to perceive the knowledge will receive it in his/her understandable language.

And as mentioned above, the significance of knowledge is to get rid of all the human sufferings and to pave the way of Liberation for mankind. Therefore the science of sound creates energy field that has the power to heal not only on physical level but on holistic level. Sanskrit chants in particular have a very profound effect on the consciousness. They activate subtle energy centers, which produce a soothing, purifying and energizing effect. Chanting of mantras or prayers has been an essential element of all religions and disciplines throughout the ages. When there is collective chanting in groups, group dynamics take over. Different and distracting thoughts are replaced by one thought and one rhythm in all minds. All minds become one. This oneness creates an intense energy field which invigorates all present. Chanting leads to the merger of all senses into one, and finally the transcendence of the mind happens Mantra chanting can be considered as the Yoga of sound or Sound Healing.

**Conclusion - Knowledge Heals!!!!**

Patanjali declares in the Yoga Sutras that the manifesting symbol for God is Om, nadam, supreme music. According to the Hatha Yoga Pradipika, the Supreme yogic state is achieved when the nada or cosmic sound can be heard. The aim of all Hatha Yoga practices is to hear this sound. In nutshell, as the title says, the language of knowledge is just the sound vibrations, the various energy patterns that get converted to into various languages of the perceiver, receiver and transmitter. For communication on the gross level to get completed, there is need of any language but on subtle level of energy world, the communication has no need of any language, because knowledge is nothing but the energy vibrations. And these energy vibrations have the power to heal also for the holistic health and wellness of humanity.

**References**


1. A.C Bhakti Vedanta Swami Prabhupada - Shrimad Bhagwatam - Chapter 26 - Shlok 33 - ISKCON Publication - 1962
2. Shrimad Bhagwadgeeta - chapter 7 - Shlok 8 - Geetapress Publication - Gorakhpur
3. The Light of the Supreme - https://savitri.in/blogs/light-of-supreme/vedic-conception-of-sound-in-four-features-by-jahnava-nitai-das#:~:text=Thus%20sound%20must%20be%20a,artha%20(meaning)%20is%20aaccepte.
4. What is sound? - https://www.kamakoti.org/hindudharma/part5/chap7.htm
5. Shiksh?: The science of sound in the Vedas - https://litenlyf.wordpress.com/2020/07/25/shiksha-the-science-of-sound-in-the-vedas/
6. https://scholar.harvard.edu/files/adam/files/phonetics.ppt.pdf
7. https://mangolanguages.com/resources-articles/sound-systems-of-language/#:~:text=In%20the%20simplest%20of%20terms,into%20patterns%20of%20meaningful%20language.
8. http://languagesindanger.eu/book-of-knowledge/the-sounds-of-language/
9. http://rnlkwc.ac.in/pdf/anudhyan/volume3/The-Concept-of-Jnana-Gargi-Medda.pdf
   https://www.google.com/search?q=sanskrit+is+the+mother+of+all+languages&oq=sanskrit+is+the+mother+&aqs=chrome.0.0i512j69i57j0i512j0i22i30l7.8460j0j15&sourceid=chrome&ie=UTF-8" https://www.radioart.com/blog/the-powerful-effect-of-the-sound-of-nature-on-human-health
10. https://www.academyofsoundhealing.com/what-is-sound-healing

# लेखकेभ्यो निवेदनम्

पाणिनीयाशोधपत्रिकायाः प्रकाशनं प्रतिवर्षं जुलाई-अक्टोबर-जनवरी-अप्रैल-मासेषु सङ्कल्पितम्। लेखकाः अनुरुध्यन्ते कृपया स्वीयशोधपत्राणि mpsvv.paniniya@gmail.com इत्यत्र समयेन प्रेषयन्तु। शोधपत्रस्य भाषा संस्कृतं हिन्दी अंग्रेजी वा भवितुं शक्नोति।

शोधपत्रं (ए 4 साईज पृष्ठेषु) सामान्यतया पंचपृष्ठात्मकम् अपेक्षते। तच्च शुद्धतया टङ्कितं भवेत्।

पाणिनीया व्यावसायिकपत्रिका नास्ति । अतः लेखकाः, शोधार्थिनः, पाठकाः, प्राध्यापकाश्चानुरुध्यन्ते कृपया पत्रिकायाः न्यूनातिन्यूनं वार्षिकसदस्यतां स्वीकुर्वन्तु । वार्षिकसदस्यतायै 3000/- रुप्यकाणि निश्चितानि सन्ति। शुल्कम् अधोरीत्या दातुं शक्यते –

**NEFT माध्यमेन**

1. IFSC Code - BKID 0009103
2. Bank Name - Bank of India
3. Branch Name - Dashara Maidan, Ujjain
4. A/c. No. - 910310210000161
5. A/c. Name - Registrar Maharshi Panini Sanskrit evam Vedic Vishavidyalaya, Ujjain

**QR कूटमाध्यमेन**

www.mpsvv.ac.in इत्यत्र गत्वा 'भुगतान' इत्यस्योपरि नुदन्तु प्राप्तनिर्देशानां पालनं विधाय धनसमर्पणं कर्तुं शक्यते। अथवा https://qrgo.page.link/Lrqnv इत्यत्र गत्वापि धनसमर्पणं कर्तुं शक्यते।

लेखस्य प्रकाशनार्थं स्वीकृति-अस्वीकृतिविषयकः अन्तिमः निर्णयः पुनरीक्षणसमितेः भविष्यति। स्वीकृतः लेखः यथापेक्षं परिष्कृतः भवितुमर्हति।

प्रकाशितशोधनिबन्धस्य विषयवस्तुगतप्रामाणिकतायै तस्य लेखकः एव उत्तरदायी भविष्यति न तु सम्पादकः प्रकाशको वा।

पत्रिकासम्बद्धस्य कस्यचिदपि विवादस्य न्यायिककेन्द्रं उज्जैनम् भविष्यति।

**Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya**

(Established by Government of Madhya Pradesh)

**Dewas Road, Ujjain (M.P.) INDIA**

**E-mail-regpsvvmp@rediffmail.com Website-www.mpsvv.ac.in**

पंचायतीराज मुद्रणालय, उज्जैन

ISSN-2321-7626 VOL. XXXVII, Year XI